## गोत्रे कुञ्जादिभ्यश्च्फञ् । (९८/१०९९)

तस्यापत्यम् इत्येव । गोत्रसञ्ज्ञकेऽपत्ये वाच्ये कुञ्जादिभ्यः च्फञ् प्रत्ययो भवति । इञोऽपवादः । चकारो विशेषणार्थः 'व्रातच्फञोरस्त्रियाम्' (५.३.११३/११००) इति । ञकारो वृद्धचर्थः । कौञ्जायन्यः, कौजायन्यौ, [1]कौञ्जायनाः । ब्राध्नायन्यः, ब्राध्नायन्यौ, ब्राध्नायनाः । गोत्रे इति किम्? कुञ्जस्यापत्यम[2]नन्तरं कौञ्जिः । [3]एकवचनद्विवचनयोः सतिशिष्टत्वात् ञित्स्वरेणैव भवितव्यम् । बहुवचने तु कौञ्जायनाः इति, [4]परमपि ञित्स्वरं [5]त्यक्त्वा चित्स्वर एवेष्यते । गोत्राधिकारश्च 'शिवादिभ्योऽण्' (४.१.११२/१११५) इति यावत् ।

कुञ्ज । ब्रध्न । शङ्ख । भस्मन् । गण । [6]लोमन् । [7]शठ । शाक । [8]शाकट । [9]शुण्डा । शुभ । [10]विपाश । [11]स्कन्द । स्तम्भ[12] ॥

## नडादिभ्यः फक् । (९९/११०१)

नड इत्येवमादिभ्यः प्रातिपदिकेभ्यः गोत्रापत्ये फक् प्रत्ययो भवति । नाडायनः । चारायणः । गोत्रे इत्येव, नाडिः । 'शलङ्कु शलङ्कं च' (ग.सू. ६७) इत्यत्र पठ्यते[13] । शालङ्कायनः । पैलादिषु शालङ्किशब्दः पठ्यते । शालङ्किः पिता । शालङ्किः पुत्रः[14] । तत्कथम्? गोत्रविशेषे [15]कौशिके फकं स्मरन्ति, इञेवान्यत्र शालङ्किः इति । अथवा [16]पैलादिपाठ एव [17]ज्ञापकः इञो भावस्य ।

नड । चर । बक । मुञ्ज । इतिक । इतिश । [18]उपक । [19]लमक । 'शलङ्कु शलङ्कं च' (ग.सू. ६७) । सप्तल । वाजप्य । [20]तिक । 'अग्निशर्मन् वृषगणे' (ग.सू. ६८) । [21]प्राण । नर । सायक । दास । मित्र । द्वीप । [22]पिङ्गर । पिङ्गल । किङ्कर । [23]किङ्कल । कातर । [24]कातल । [25]काश्य । काश्यप । [26]काव्य । अज । [27]अमुष्य । 'कृष्णरणौ ब्राह्मणवासिष्ठयोः' (ग. सू. ६९)[28] । [29]अमित्र । लिगु । चित्र । कुमार । 'क्रोष्टु क्रोष्टं च' (ग. सू. ७०)[30] । लोह । दुर्ग । स्तम्भ । शिंशपा । [31]अग्र । तृण । शकट । [32]सुमनस् । [33]सुमत । मिमत ।[34] ऋक् । जत् । युगन्धर । [35]हंसक । दण्डिन् । हस्तिन् । [36]पञ्चाल । चमसिन् । [37]सुकृत्य । स्थिरक । ब्राह्मण । [38]चटक । [39]बदर । अश्वक । खरप । कामुक । ब्रह्मदत्त । उदुम्बर । शोण । [40]अलोह । [41]दण्ड ॥

## हरितादिभ्योऽञः । (१००/११०२)

हरितादिर्बिदाद्यन्तर्गणः । हरितादिभ्योऽञन्तेभ्यो[42]ऽपत्ये फक् प्रत्ययो भवति । इञोऽपवादः । हरितस्यापत्यं हारितायनः । [43]कैन्दासायनः । ननु च गोत्रे इति वर्तते । न [44]च गोत्रादपरो गोत्रप्रत्ययो भवति

---

1. बहुषु पुनः इत्यधिकम् फ. 2. अनन्तरः क. ड. इ. 3. एकवचनद्विवचनयोः नास्ति अ. क. 4. परमपि नास्ति ब. ई. 5. बाधित्वा ड. फ. 6. गोमन् ब. ई. 7. शठ नास्ति ब. ई, शाक नास्ति इ. ई. 8. नास्ति क. 9. गुण्ड क, शिवांशु ब.इ.ड.ई. 10. निपाक ब. 11. यस्क स्कन्ध ब. 12. स्कम्भ ब, नास्ति क.फ.ई. 13. अस्यार्थः । शलङ्कुशब्दः प्रत्ययमुत्पादयति, शलङ्कं चादेशमाप्नोति इत्यधिकम् क. 14. इति इत्यधिकम् फ. 15. केचित् इत्यधिकम् फ, लौकिके ह. 16. पैलादिषु पाठः ड. 17. ज्ञापकम् ड. 18. उवक ड. 19. मलक फ. 20. याजिन्या यतिक ड. 21. प्राणक क. 22. नास्ति फ. 23. नास्ति क. ड. ई. 24. कावेल क, काकल फ, कथन कातर काश्पल ग. 25. ताव्य ब. 26. बाव्य शैव्य ड. 27. गाव्य ड. 28. कृष्णायनः ब्राह्मणः, राणायनः वासिष्ठः इत्यधिकम् ड. 29. सुमित्र फ. 30. क्रोष्टायनः इत्यधिकम् फ. 31. नास्ति फ. 32. नास्ति ड.फ. 33. नास्ति क. 34. सामन् रुकक्ष अमृत ड. 35. दंशक क, हस्तक ड. 36. पञ्चहस्तिन् ड. 37. शास्त्रकृत् ड, असुरकृत्य फ. 38. वटक ड. 39. वडर अश्वल ब. क. ड. 40. परोक्ष लोह ड. 41. दण्डप ड, अन्वजत् ब.क, इत्वरा ब.क.फ, अशक ब. 42. गोत्रापत्ये फ. 43. कैन्दायनः क. 44. च नास्ति फ.